दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लचतुर्थी
बैशाख 07 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-178 | 1 | अप्रैल 20, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 President's Himachal Tour - 'अटल-कन्दरायाः अनुपम-अभियन्त्रिकीं ज्ञास्यति राष्ट्रपतिः द्रौपदी मुर्मू, हिमाचल-प्रवासस्य कार्यक्रमः प्रकाशितः

3 गोवाराज्यस्य साध्वी सैल 'फेमिना मिस इण्डिया वर्ल्ड-२०२६' इति प्रतियोगितायाः विजित्री अभवत्

4 सत्य साईं सेवा सङ्गठनस्य तत्त्वाधाने कोटला-नगरस्य सामुदायिक-चिकित्सालये निःशुल्क-चिकित्साशिविरस्य आयोजनम्

## देशस्य विकासाय अधिकाधिकाः महिलाः राजनीतौ आगच्छेयुः - प्रधानमन्त्री नरेन्द्रमोदी



प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् देशस्य विकासाय अधिकाधिकाः महिलाः राजनीतौ आगच्छेयुः। श्रीमोदी बाँकुरा-जनपदस्य विष्णुपुर-नगरे आयोजिते जनसभायां आरोपितवान् यत् तृणमूलकांग्रेसदलं नवत्रिंशदधिकद्विसहस्र तमे वर्षे महिला-आरक्षण-विधेयकस्य पारणं निरोद्धं कांग्रेसदलेन सह संयुता आसीत्। सः सबलं प्रतिपादितवान् यत् भारतीय-जनता-पार्टीति दलम् इदानीं महिला सशक्तिकरणस्य पर्यायः अभवत्, अपि च तेषां सुरक्षाय प्रतिबद्धः अस्ति।

### प्रधानमन्त्री आरोपितवान् यत् तृणमूलकांग्रेसदलम् तथा कांग्रेसदलम् उभे आदिवासीजनानां विरोधिनौ स्तः।

प्रधानमन्त्री आरोपितवान् यत् तृणमूलकांग्रेसदलम् तथा कांग्रेसदलम् उभे आदिवासीजनानां विरोधिनौ स्तः। तेन उक्तं यत् राष्ट्रपतेः चयनसमये उभाभ्यां दलाभ्यां द्रौपदी मुर्मुः विरुद्धं प्रत्याशी स्थापितः आसीत्। श्रीमोदी आरोपितवान् यत् तृणमूल कांग्रेसदलस्य शासनकाले पश्चिमबङ्ग-राज्यस्य जनानां मध्ये भयस्य वातावरणं निर्मितमासीत्।

तेन उक्तं यत् जनाः अधुना भारतीय-जनता-पार्टीति दलम् प्रति विश्वासं प्रदर्शयन्ति। पश्चिमबङ्गे तृणमूलकाङ्ग्रेसदलस्य अध्यक्षा तथा पश्चिमबङ्गस्य मुख्यमन्त्री ममता बनर्जी हुगली-पूर्वबर्धमान जनपदयोः दलस्य प्रत्याशिनां समर्थनार्थं जनसभाः कृतवती। ममता बनर्जी भारतीयजनतापार्टीतिदलम् प्रति जनान् भ्रमयितुम् आरोपितवती। भारतीयजनतापक्षस्य नेता त्रिपुराराज्यस्य मुख्यमन्त्री मानिक साहा मुर्शिदाबाद-जनपदस्य जियागंज-कांदि-स्थानेषु मार्गप्रदर्शनेषु सहभागं कृतवान्। काङ्ग्रेसदलम्, वामपन्थिदलानि अन्यानि च राजनैतिकदलानि अपि स्वप्रचारं तीव्र कृतवन्तः।

## पश्चिमबङ्ग-तमिलनाडुराज्ययोः निर्वाचनप्रचारः सजवं प्रचलतः विभिन्नदलानां नेतारः मतदातृन् आकर्षयितुं निरन्तरं सभाः कुर्वन्ति



तमिलनाडुराज्ये भारतीयजनतापार्टीति दलस्य वरिष्ठनेता तथा केन्द्रीयगृहमन्त्री अमितशाहः इरोड-जनपदस्य शिवगिरि-मोडक्कुरिची-स्थानयोः निर्वाचनप्रचारं कृतवान्। सः अवदत् यत् राज्ये ए.आई.ए.डी.एम. के-दलस्य महासचिवः एडप्पाडी के. पलानीस्वामी-नेतृत्वे एनडीए-संघटनं सुदृढं सफलं च अस्ति। सः डीएमके-प्रशासनस्य निष्क्रियतां जनकल्याणस्य उपेक्षां च आलोचितवान्। नमक्कल-स्थाने प्रचारं कुर्वन् ए.आई.ए.डी.एम. के-दलस्य महासचिवः एडप्पाडी के. पलानीस्वामी अवदत् यत् सत्ता प्राप्ते सति तस्य दलं कृषकेभ्यः चतुर्दशशतयूनिटमितं विद्युतं निःशुल्कं प्रदास्यति।

## भारतस्य उपराष्ट्रपतिः सी.पी. राधाकृष्णन द्विदिवसीयायाः आधिकारिकयात्रायाः कृते कोलम्बो नगरे सम्प्राप्तः

भारतस्य उपराष्ट्रपतिः सी. पी. राधाकृष्णन द्विदिवसीयायाः आधिकारिकयात्रायाः कृते कोलम्बो नगरे सम्प्राप्तः। सः कोलम्बोस्थिते राष्ट्रपति-सचिवालये अनुरा कुमार दिसानायके इत्यनेन सह मेलनं कृतवान्। उभौ नेतारौ भारत-श्रीलंका-देशयोः मध्ये इतिहासस्य तथा सांस्कृतिक-सम्बन्धानां दृढ आधारे स्थापितानां सम्बन्धानाम् अधिकसुदृढीकरणार्थं विस्तृतां सार्थकां च चर्चाम् अकुरुताम्। उपवेशनेस्मिन् श्रीराधाकृष्णन भारतस्य 'पड़ोसी प्रथम' इति नीतौ प्रतिबद्धतां प्रकटयता पारस्परिक-विकासार्थं निरन्तर सहयोगस्य आवश्यकतां प्रतिपादितवान्। एषा यात्रा उभयोः देशयोः मध्ये द्विपक्षीयानां सम्बन्धानां निरन्तर-प्रगतिं प्रदर्शयति।

## प्राशासनिकदोष अथवा आधारभूतसंरचनायाः अभावेन च सुदीर्घ-मार्गाः संकट-मार्गाः न भवेयुः - सर्वोच्च न्यायालयः



सर्वोच्च न्यायालयः देशे सर्वत्र मार्ग सुरक्षां संवर्धयितुं निर्देशान् प्रख्यापितवान्। न्यायालयः उक्तवान् यत् प्राशासनिकदोष अथवा आधारभूतसंरचनायाः अभावेन च सुदीर्घ-मार्गाः संकट-मार्गाः न भवेयुः।

न्यायमूर्तिः जे.के. माहेश्वरी तथा च ए.एस. चंदुरकर चेत्येतयोः पीठेन उक्तम् यत् भारतस्य समग्रमार्ग-जाले केवलं द्वे प्रतिशतं भागः राष्ट्रियराजमार्गाणां वर्तते, परञ्च मार्ग दुर्घटनासु मृत्युंगतानां प्रायः त्रिंशत् प्रतिशतं भागः तेषामेव अस्ति। न्यायालयः अपि अवदत् यत् राजमार्गे असामयिक दुर्घटनायां एकस्यापि जीवस्य नाशः राज्यस्य विफलतां सूचयति। पीठेन सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां चेत्यादीनां राजमार्गाणां उन्नयनार्थं शीघ्रं उपायान् कर्तुं निर्देशाः अपि प्रदत्ताः।

## दक्षिणकोरियादेशस्य राष्ट्रपतिः ली जाए म्युंग त्रिदिवसीय-भारतयात्रायाः कृते देहलीं सम्प्राप्तः

दक्षिणकोरियादेशस्य राष्ट्रपतिः ली जाए म्युंग त्रिदिवसीय-भारतयात्रायाः कृते नवदेहलीं सम्प्राप्तः। राष्ट्रपति-महोदयस्य इयं प्रथमा भारतयात्रा अस्ति। विदेशमन्त्रालयेन एकां विज्ञप्तिं निर्गत्य उक्तं यत् एतस्याः यात्रायाः अवसरे राष्ट्रपतिः ली, प्रधानमंत्रीणा नरेन्द्रमोदी-महोदयेन सह विभिन्नेषु क्षेत्रेषु द्विपक्षीयसहयोगं सुदृढं कर्तुं विचार-विमर्शं करिष्यति।

## सुभाषितम्

**विदेशेषु धनं विद्या,**
**व्यसनेषु धनं मतिः।**
**परलोके धनं धर्मः,**
**शीलं सर्वत्र वै धनम्॥**

भावार्थः- परदेस में रहने के लिए विद्या ही धन है, व्यसनी व्यक्ति के लिए चतुरता ही धन है, परलोक की कामना करने वाले के लिए धर्म ही धन हैं किन्तु शील (सदाचार) सर्वत्र (समस्त स्थानों के लिए) ही धन है।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## समग्रे देशे अक्षयतृतीया-पर्व उत्साहेन आचरितः

समग्रे देशे अक्षयतृतीया-पर्व उत्साहेन आचरितः। एषः पर्व सौभाग्यस्य सफलतायाश्च प्रतीकः अस्ति। अस्मिन् दिने जनाः देवताभ्यः सौभाग्यप्राप्तये प्रार्थनां कुर्वन्ति। प्रधानमन्त्री नरेन्द्रमोदी अक्षय-तृतीयायाः अवसरे नागरिकेभ्यः शुभाशंसाः प्रेषितवान्। सामाजिक-माध्यमेषु एकस्मिन् लेखे प्रधानमन्त्रिणा उक्तं यत् अयं उत्सवः पुण्यकर्मणां दानस्य सेवायाश्च मार्गे चलितुं प्रेरयति। श्रीमोदी कामनां कृतवान् यत् अयं पर्वः सर्वेषां जीवने सुखं समृद्धिं च उत्तमं स्वास्थ्यं च आनयतु। समग्रे देशे परशुराम जयंती अपि आचर्यते। भगवान् परशुरामः श्रीविष्णोः षष्ठः अवतारः अस्ति।

# President's Himachal Tour - 'अटल-कन्दरायाः अनुपम-अभियन्त्रिकीं ज्ञास्यति राष्ट्रपतिः द्रौपदी मुर्मू, हिमाचल-प्रवासस्य कार्यक्रमः प्रकाशितः





**हिमसंस्कृतवार्ताः - शिमला।** राष्ट्रपति-महोदयायाः द्रौपदी-मुर्मू-वर्यायाः हिमाचल-प्रवासं अधिकृत्य शनिवासरे मुख्यसचिवेन सञ्जय-गुप्तेन सम्बद्ध-विभागैः सह उच्चस्तरीय-गोष्ठीं कृत्वा सज्जीकरणाय अन्तिम-रूपं दातुं निर्देशाः दत्ताः। राष्ट्रपति-महोदया २७ अप्रैल दिनाङ्के शिमला-नगरम् आगमिष्यति तथा च २ मई दिनाङ्के प्रतिगमिष्यति। अस्मिन् अन्तराले सा लाहौल-पालमपुर-क्षेत्रयोः अपि गमिष्यति। शिमला-नगरे अपि एकं दिनं 'आरट्रैक' (ARTRAC) गमनस्य कार्यक्रमः अस्ति। अस्मिन् क्रमे राष्ट्रपति-महोदया रोहताङ्ग-स्थितस्य 'अटल-कन्दरायाः' दर्शनस्य इच्छां प्रकटितवती, येन सा अभियन्त्रिक्यायाः (Engineering) एतं अनुपमं प्रतिरूपं बोधुं शक्नुयात्। राष्ट्रपतिः सैन्यबलस्य 'सुप्रीम कमाण्डर' (सर्वोच्च-सेनापतिः) अपि अस्ति। सा २९ अप्रैल दिनाङ्के शिमलातः 'सिस्सु' क्षेत्रं गमिष्यति तथा च प्रायः होराद्वयं यावत् एतस्य कन्दरायाः निरीक्षणं करिष्यति। कन्दरायाः उत्तरीद्वारे ' (North Portal) सीमा-मार्ग-सङ्घटनम् (BRO) तस्य उपरि प्रस्तुतीकरणं (Presentation) अपि दास्यति।

हिमालयस्य दुर्गम-शिखराणां मध्ये निर्मिता अटल-कन्दरा न केवलं भारतस्य अपितु विश्वस्तरे आधुनिक-अभियन्त्रिक्यायाः उत्कृष्टम् उदाहरणं मन्यते। प्रायः ९.०२ किलोमीटर् दीर्घा एषा कन्दरा विश्वस्य दीर्घतमासु 'हाइवे' कन्दरासु अन्यतमा अस्ति, या वर्षपर्यन्तं रोहताङ्ग-दर्रां प्रति सम्पर्कं सुनिश्चितं करोति। समुद्रतलात् प्रायः १०,००० पादपरिमितस्य (feet) उन्नतौ एतस्याः कन्दरायाः निर्माणं अत्यन्तं कठिनेषु परिस्थितिषु कृतम्। प्रबला हिमवृष्टिः, हिमस्खलनं (Avalanche), अत्यधिकं शैत्यं तथा कोमला भूगर्भीय-संरचना च अभियन्तॄणां (Engineers) पुरतः महदाह्वानानि प्रस्तुतवन्तः। तथापि, सीमा-मार्ग-सङ्गठनेन अत्याधुनिक-तन्त्राणां सटीक-योजनानां च माध्यमेन एषा परियोजना सफलतापूर्विका पूर्णा कृता।

**राष्ट्रपति-महोदयायाः हिमाचल-प्रवासः**

> २७ अप्रैल : मध्याह्ने १२ वादने देहलीतः कल्याणी-हेलिपैड (मशोबरा) आगमनम्। मुख्यमन्त्री तस्याः स्वागतं करिष्यति।

> २८ अप्रैल : मशोबरा-स्थित-राष्ट्रपति-निवास (Retreat) मध्ये एव विश्रामं करिष्यति।

> २९ अप्रैल : अटल-कन्दरायाः दर्शनाय शिमलातः लाहौल-प्रस्थानम्। सायङ्काले प्रत्यागमनम्।

> ३० अप्रैल : शिमलातः पालमपुर-कृषि-विश्वविद्यालयस्य १७ तमे दीक्षान्त-समारोहाय प्रस्थानम्। अपराह्णे 'आरट्रैक' (ARTRAC) शिमला-कार्यक्रमः।

> १ मई : राष्ट्रपति-निवासे 'ऐट होम' (At Home) आयोजनम्। मुख्यमन्त्री, मन्त्रिणः, अधिकारिणश्च अत्र सम्मिलिताः भविष्यन्ति।

> २ मई : प्रातः ११ वादने कल्याणी-हेलिपैडतः देहलीं प्रति प्रस्थानम्।

**अटल-कन्दरया मनाली-लाहौल-यात्रा पञ्च-होराभिः न्यूनीकृता**

अटल-कन्दरायां अत्याधुनिक-सुरक्षा-व्यवस्थाः स्थापिताः सन्ति। अस्मिन् प्रत्येकं ५०० मीटर् दूरे आपत्कालीन-निकासः, अग्निशमन-प्रणाली, सी.सी.टी.वी. (CCTV) निरीक्षणं तथा अत्याधुनिकं 'वेन्टीलेशन' तन्त्रं च विद्यते। कन्दरायां वायोः गुणवत्तां रक्षितुं स्वयञ्चालित-सेन्सर् (Sensor) अपि स्थापिताः सन्ति। एषा कन्दरा लाहौल-स्पीति-मण्डलं मनाली-नगरेण सह वर्षपर्यन्तं योजयति, येन यात्रा-समये प्रायः ४-५ होराणां न्यूनता अभवत्। एतेन सह, एषा भारतीय-सेनायाः आवागमनस्य कृते अपि अत्यन्तं महत्त्वपूर्णा अस्ति तथा सीमावर्ती-क्षेत्राणां सुलभतां वर्धयति।

# उद्योग-श्रम-रोजगारमन्त्री हर्षवर्धनचौहानः जोंगपुल-सुनोउ बास सम्पर्कमार्गस्य उद्घाटनं कृतवान्



**हिमसंस्कृतवार्ताः - नाहनम्।** उद्योग-संसदीयकार्य-श्रम-रोजगारमन्त्री हर्षवर्धनचौहानः रविवासरे शिलाई-विधानसभाक्षेत्रस्य ग्रामपञ्चायत-माशु मध्ये प्रायः १५ लक्षरूप्यकाणां व्ययेन निर्मितस्य जोंगपुल-सुनोउ बास सम्पर्कमार्गस्य विधिवत् उद्घाटनं कृतवान्। तदनन्तरं उद्योगमन्त्री अधिकारिभिः सह अस्य सम्पर्कमार्गस्य निरीक्षणमपि अकरोत्। जनसभां सम्बोधयन् उद्योगमन्त्री अवदत् यत् जोंगपुल-सुनोउ बास सम्पर्कमार्गः क्षेत्रवासिनां सुदीर्घकालीनी अभ्यर्थना आसीत्। अस्य मार्गस्य अद्यैव वन-स्वीकृतिः कारिता तथा च निर्माणानन्तरं अद्य उद्घाटनमपि जातम्। सः अवदत् यत् अस्मिन् क्षेत्रे प्रायः पञ्चशतं (५००) तः अधिका जनसङ्ख्या अनेन मार्गेण लाभान्विता भविष्यति। सः उक्तवान् यत् शिलाई-विधानसभाक्षेत्रस्य प्रत्येकस्य भागस्य समग्रविकासः तस्य प्राथमिकता वर्तते, यस्य परिणामतः सर्वत्र विकासः सुनिश्चितः क्रियते। सः अवदत् यत् मार्ग-शिक्षा-स्वास्थ्य-पेयजल-आदि मूलभूतसुविधाभ्यः शिलाई-क्षेत्रे बह्व्यः योजनाः प्रचलन्ति, येभ्यः ३०० कोटिः तः अधिकं धनं (बजट) स्वीकृतं वर्तते, येषां कार्याणि च प्रगतिपथे सन्ति।

# केन्द्रीयमन्त्री डॉ. जितेन्द्रसिंहः अवदत्- महिलानाम् अधिकारैः सह विपक्षेण कृतः विश्वासघातः

हिमसंस्कृतवार्ताः - शिमला। केन्द्रीयमन्त्री (स्वतन्त्रप्रभारः) डॉ. जितेन्द्रसिंहः 'नारीशक्ति वन्दन अधिनियम्' इति अधिकृत्य काङ्ग्रेस-दलस्य 'आईएनडीआई' (I.N.D.I.A.) गठबन्धनस्य च उपरि तीक्ष्णप्रहारं कृतवान्। सः काङ्ग्रेसदलं लक्ष्यीकृत्य अवदत् यत् गतेभ्यः ५० वर्षेभ्यः महिला-आरक्षणस्य चर्चां कुर्वता दलेन कदापि एतत् प्रयोक्तुं साहसं न प्रदर्शितम्। यदा भाजपासर्वकारेण ठोससमाधानं प्रस्तुतं, तदा विपक्षेण विविधव्याजानां तकनीकी-विषयाणां च आश्रयं स्वीकृत्य एषा प्रक्रिया रोद्धुं प्रयासः कृतः। सः एतत् महिलानाम् अधिकारैः सह विश्वासघातः इति घोषितवान्।

शिमला-नगरे रविवासरे संवाददातृसम्मेलने (प्रेसवार्तायाम्) सः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी २०१४ वर्षे सत्तां स्वीकृतौ एव स्पष्टं कृतवान् आसीत् यत् तस्य सर्वकारः निर्धन-महिला-युव-कृषकान् केन्द्रस्थाने संस्थाप्य कार्यं करिष्यति। तेन उक्तं यत् महिलासशक्तीकरणं मोदी-सर्वकारस्य सर्वोच्चप्राथमिकतासु अन्यतमं वर्तते, गते एकस्मिन् दशके च यत् परिवर्तनं दृश्यते तत् अभूतपूर्वम् अस्ति। सः २०१४ वर्षस्य अगस्त-मासस्य १५ दिनाङ्के प्रधानमन्त्रिणः सम्बोधनस्य उल्लेखं कुर्वन् अवदत् यत् रक्तदुर्गात् (लाल किला) शौचालय-निर्माणस्य चर्चा एका क्रान्तिकारिणी चिन्ता आसीत्, यया महिलानां स्वास्थ्यं, गरिमा, सुरक्षा च राष्ट्रियविमर्शस्य भागः कृता। 'उज्ज्वला' योजनया कोटिशः महिलाः धूमात् मुक्ताः कृताः, तासां स्वास्थ्येन सह जीवनस्य गुणवत्तायाम् अपि विकासः कृतः।'नारीशक्ति वन्दन अधिनियम्' इति सन्दर्भे सः अवदत् यत् एषः नियमः महिलानां नीतिनिर्माण-निर्णयप्रक्रियासु च सशक्तसहभागितां सुनिश्चितं कर्तुं माध्यमः अस्ति। डॉ. जितेन्द्रसिंहः अवदत् यत् भाजपादलेन स्वसङ्घटने पूर्वमेव महिलाभ्यः ३३ प्रतिशतात् अधिकां सहभागिता दत्ता अस्ति, यदा तु काङ्ग्रेसपक्षः अद्यावधि स्वसङ्घटने अपि एतत् प्रवर्तयितुं न शक्तः। सः अवदत् यत् काङ्ग्रेसदले महिलाभ्यः अवसराः न, अपितु परिवारवादस्य आधारेण परिमितं स्थानं लभते **शेष ४ पृष्ठे...**

# हिमाचले नेतॄणाम् अनन्तरम् अधिकारिणां वेतने अपि अस्थायी-रोधः, षण्मासान् यावत् स्थगितम्



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे व्याप्तस्य वित्तीयसङ्कटस्य मध्ये राज्यसर्वकारेण कश्चन बृहत् प्रशासनिकनिर्णयः स्वीकृतः। अनेन वरिष्ठाधिकारिणां वेतनस्य कश्चन भागः अस्थायीरूपेण स्थगितुं (Defer) आदेशः प्रसारितः। अस्य निर्णयस्य अन्तर्गतं मुख्यसचिव-अतिरिक्तमुख्यसचिव-प्रधानसचिव-आरक्षकमहानिदेशक (DGP) सदृशेषु उच्चपदेषु कार्यरतानाम् अधिकारिणां ३० प्रतिशतं वेतनं आगामि-षण्मासान् यावत् रोधिष्यते। तत्रैव सचिव-विभागाध्यक्ष-आईजी (IG)-डीआईजी (DIG)-आरक्षकाधीक्षक (SP) तथा वनविभागस्य अधिकारिणां २० प्रतिशतं वेतने अस्थायी-रोधः भविष्यति।सर्वकारेण प्रसारितायाः अधिसूचनायाः अनुसारं एषा व्यवस्था अप्रैल २०२६ मासस्य वेतनात् (यस्य वितरणं मई-मासे भविष्यति) प्रवर्तितं भविष्यति। सर्वकारस्य कथनम् अस्ति यत् राज्यस्य दुर्बलाम् आर्थिकस्थितिं नियन्त्रितुं तथा वित्तीयप्रबन्धनं सुदृढं कर्तुं एतत् पदं उत्थापितम्। एतेन सह मण्डल-निगम-पी.एस.यू. (PSU)-विश्वविद्यालय-अनुदानप्राप्तसंस्थाभ्यः अपि एषा व्यवस्था स्वीकर्तुं निर्देशाः दत्ताः। सर्वकारेण स्पष्टीकृतं यत् एषा 'वेतनकर्तनं' (Salary cut) नास्ति, अपितु 'अस्थायी-स्थगनम्' अस्ति, रोधिता राशिः भविष्ये आर्थिकस्थितेः उन्नयनात् पश्चात् प्रदास्यते। एषा राशिः पेन्शन-लीव-इनकैशमेण्ट् सदृशेषु लाभेषु अपि सम्मिलिता भविष्यति। 'ई-सैलरी' (e-Salary) प्रणाल्यां अस्य पूर्णं विवरणं उपलब्धं भविष्यति। ये अधिकारिणः ऋणं (Loan) स्वीकृतवन्तः, तेभ्यः संबलं प्रदाय सर्वकारेण विकल्पः दत्तः यत् ते आवेदनं कृत्वा ई.एम.आई. (EMI) कर्तनानन्तरं अवशिष्टायां राशौ एव स्थगनं कारयितुं शक्नुवन्ति।

# दिल्ली पब्लिक स्कूल, वाराणस्यां "सराहना- 2026" अलङ्करण-समारोहः- उपलब्धीनां प्रकाशे विकासमानानां स्वप्नानाम् अद्वितीयः उत्सवः






**हिमसंस्कृतवार्ताः- दिल्ली।**
दिल्ली पब्लिक विद्यालयस्य प्रेरणादायके सत्रे २०२५–२६ अन्तर्गतं आयोजितः "सराहना- 2026" नामकः अलङ्करण-समारोहः गरिमामये, प्रेरणादायके च उल्लासपूर्णे वातावरणे सम्पन्नः। अयं समारोहः केवलं सम्मानस्य मंचः नासीत्, अपि तु विद्यार्थिनां परिश्रमस्य, समर्पणस्य उत्कृष्टतायाश्च उत्सवरूपेण प्रकटितः।
अस्य कार्यक्रमस्य प्रथमचरणे नवमी-एकादशी कक्षयोः, द्वितीयचरणे षष्ठी-तृतीया (६–८) कक्षाणां मेधावी छात्राः अलङ्कृताः। प्रथमचरणे मुख्यातिथिरूपेण ब्रिगेडियर जयदीप चन्दा (३९ जीटीसी, वाराणसी) विराजमानः। द्वितीयचरणे च अपरमण्डल- रेल- प्रबन्धकः (इन्फ्रा) अजयसिंहः मुख्यातिथिरूपेण उपस्थितः आसीत्।मुख्यातिथेः स्वागतं विद्यालयस्य प्राचार्या मुनमुन सेनगुप्तावर्या, शैक्षणिकप्रमुखा रोली मानखण्डवर्या, लर्निंग- लीडर किरण शर्मा, जनसंपर्क-अधिकारी आनन्दिता माथुर च कृतवत्यः। तुलसीवृक्षस्य रोपणेन स्मृतिचिह्न- प्रदानेन च तेषां सम्मानः कृतः। अस्मिन् अवसरः अभिभावकाः अपि सान्निध्यं वहन्तः आसन्।कार्यक्रमस्य शुभारम्भः स्वागत-शब्दैः शङ्खध्वन्या च अभवत्, येन समग्रं वातावरणं सकारात्मक- ऊर्जया पूरितम्। दीपप्रज्वलनं कृत्वा ज्ञानस्य प्रकाशः नमितः। एषः आरम्भः सम्पूर्णं समारोहं गरिमया प्रेरणया च आलोकितवान्।दीपप्रज्वलनं मुख्यातिथिना अन्यैः गणमान्य- अतिथिभिः सह सम्पन्नम्। अस्मिन् अवसरः प्राचार्या, शैक्षणिकप्रमुखा, समर्पण-विंगस्य (९–१२) समन्वयिका किरण शर्मा, चेतना-विंगस्य (६–८) समन्वयिका सुनीपा सान्याल तथा अभिभावकाः अपि उपस्थिताः आसन्।तत्पश्चात् सांस्कृतिक-कार्यक्रमे छात्रैः शिव-स्तुतिः प्रस्तुतिता। पुष्पाञ्जलिनृत्यम् अपि मनोहरं आसीत्। चेतना-विंगस्य विद्यार्थिभिः नृत्य-गीत-प्रस्तुतेः माध्यमेन उत्साहः, सृजनशीलता, आत्मविश्वासः च सुन्दररूपेण अभिव्यक्तः।कार्यक्रमे नवमी-कक्षायां ९१% अधिकाङ्क-प्राप्ताः २९ छात्राः "ब्लू स्वेटर" इति प्रदानेन अलङ्कृताः। एकादशी- कक्षायां २५ छात्राः स्वर्ण-पदकैः अलङ्कृताः। शत-प्रतिशत-उपस्थितिः दर्शयन्तः छात्राः अपि सम्मानिताः।
षष्ठी–अष्टमी कक्षासु अपि विभिन्न-श्रेणीषु छात्राः अलङ्कृताः। षष्ठ्यां "इल्यूमिनिटी बैज", सप्तम्यां "ब्लू बेल्ट", अष्टम्यां "ब्लू टाई" इत्यादिभिः। उत्कृष्टप्रदर्शनं कृतवन्तः सर्वे छात्राः प्रशस्तिपत्रैः सम्मानिताः।
मुख्यातिथिः ब्रिगेडियर जयदीप चन्दा विद्यार्थिनः सम्बोधयन् अवदत् यत् जीवनस्य सफलतायां केवलं अङ्काः न, अपि तु अनुभवः कौशलं च अत्यावश्यकम्। 'सक्सेस माइण्डसेट', 'लाइफ- लॉन्ग लर्नर' इत्यादीनां मूल्यानां महत्वं अपि तेन प्रतिपादितम्।
अपरमण्डल- रेल- प्रबन्धकः अजयसिंहः अपि विद्यार्थिनः अनुशासनं, सततप्रयत्नं, सकारात्मक-चिन्तनं च प्रति प्रेरितवान्। सः अवदत् यत् शिक्षा केवलं ज्ञानप्राप्तिः न, अपि तु चरित्र-निर्माणस्य संस्कारस्य च साधनम् अस्ति।
प्राचार्या मुनमुन सेनगुप्ता मुख्यातिथेः प्रति आभारं व्यक्तवती, विद्यार्थिनाम् उज्ज्वल-भविष्ये च विश्वासं प्रकटितवती। लर्निंग-लीडर किरणशर्मा अपि अतिथेः सेवायाः प्रशंसां कृतवती। सुनीपा सान्याल छात्राणां सफलतायाः अभिनन्दनं कृतवती। सर्वे छात्राः पदकैः प्रशस्तिपत्रैः च सम्मानिताः। कार्यक्रमस्य संचालनं धन्यवादज्ञापनं च छात्रैः शिक्षिकाभिः सह सम्पन्नम्। अन्ते राष्ट्रगानस्य गानं कृत्वा समारोहस्य समापनम् अभवत्। "सराहना– 2026" वास्तवमेव एकः प्रेरणादायकः उत्सवः आसीत्, यस्मिन् विद्यार्थिनां स्वप्नानि अधिकं उज्ज्वलानि अभवन् तथा तेषाम् अन्तः प्रेरणायाः दीपः प्रज्वलितः।

# गोवाराज्यस्य साध्वी सैल 'फेमिना मिस इण्डिया वर्ल्ड-२०२६' इति प्रतियोगितायाः विजित्री अभवत्



गोवाराज्यस्य **साध्वी सैल** ओडिशाराज्यस्य भुवनेश्वरे आयोजितस्य **'फेमिना मिस इण्डिया वर्ल्ड-२०२६'** इत्यस्य भव्य-समापन-समारोहे (Grand Finale) विजित्री घोषिता। सा अस्य समारोहस्य सर्वोच्चसम्मानेन अलंकृता, आगामिनि 'मिस वर्ल्ड' (विश्वसुन्दरी) स्पर्धायां भारतस्य प्रतिनिधित्वं कर्तुम् अवसरं च प्राप्तवती। अस्यां स्पर्धायां महाराष्ट्रस्य **राजनन्दिनी** 'प्रथम रनरअप' (द्वितीयस्थानं) तथा च केन्द्रशासितप्रदेशानां संयुक्ता प्रतिनिधिः **श्रीअद्वैता** 'सेकण्ड रनरअप' (तृतीयस्थानं) इति घोषिता।

# बद्दी-क्षेत्रस्य बसन्ती-बागे विद्युत्-परिवर्तके (ट्रांसफार्मर) विस्फोटः, द्वे वाहने दग्धे

हिमसंस्कृतवार्ताः - बद्दी।हिमाचलस्य सोलनजनपदस्य औद्योगिकक्षेत्रस्य बद्दी-नगरस्य 'बसन्ती बाग' स्थले रविवासरे विद्युत्-परिवर्तके (Transformer) विस्फोटकारणात् अग्निः प्रज्वलितः, येन क्षेत्रे सर्वत्र धावमानता (अफरा-तफरी) व्याप्ता। प्रत्यक्षदर्शिनाम् अनुसारं विद्युत्-परिवर्तकस्य अत्यधिकतापस्य (Overheat) कारणात् अकस्मात् विस्फोटः अभवत्। तस्मात् निर्गताभिः स्फुलिङ्गाभिः (चिंगारियों से) समीपे स्थिते द्वे वाहने अग्न्याक्रान्ते अभवताम्। पश्यतामेव द्वे अपि वाहने पूर्णतया दग्धे जाते।
स्थानीयजनैः झटिति अस्य सूचना आरक्षकदलाय (Police) अग्निदमनविभागाय (Fire Brigade) च दत्ता। सूचनां प्राप्य आरक्षकदलं अग्निशामकविभागश्च घटनास्थलं प्राप्तवन्तौ, महता परिश्रमेण च अग्निः शान्तः कृतः। समयपूर्णं अग्निशामकदलेन समीपे स्थितानि अन्यानि वाहनानि सम्पत्तयश्च सुरक्षिताः रक्षिताः। अस्मिन् अपघाते सौभाग्यवशात् कापि जनहानिः न अभवत्। प्रारम्भिकान्वेषणे विद्युत्-परिवर्तकस्य 'ओवरहीटिंग' एव विस्फोटस्य मुख्यं कारणं मन्यते, तथापि आरक्षकदलेन प्रकरणस्य विस्तृतमन्वेषणं क्रियते।

# अन्ताराष्ट्रिय-योगदिवस-२०२६ इत्यस्य काउन्टडाउन- कार्यक्रमस्य अङ्गरूपेण "स्वस्थतायै प्रज्ञायै विश्वशान्तये च योगः"






**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः।**
भारतसर्वकारस्य आयुषमन्त्रालयस्य तथा मोरारजी देसाई- राष्ट्रिययोगसंस्थानस्य (MDNIY) पृष्ठपोषकतायाम्, नलवारीस्थ- कुमारभास्करवर्म-संस्कृत- पुरातन- अध्ययन- विश्वविद्यालयस्य योगविज्ञानविभागेन आभ्यन्तरिणगुणवत्ता-आश्वासनकेन्द्रस्य (IQAC) सहयोगेन आगामिनि २१ अप्रैल, २०२६ तमे दिने "द्वादश- अन्ताराष्ट्रिय-योगदिवस–२०२६" इत्यस्य काउन्टडाउन कार्यक्रमः आयोजितः। कार्यक्रमोऽयं नलवारी- जनपदस्य नाहरवारीस्थ- वनभाग- बटाहगिला- उच्चतर-माध्यमिक- विद्यालये अनुष्ठितः भविष्यति। प्रातः ६:३० वादनतः आरभ्यमाणस्य अस्य कार्यक्रमस्य मुख्यमुद्देश्यं समग्रदेशे योगस्य प्रसारः, समग्रस्वस्थतायाः क्षेत्रे च योगस्य महत्त्वविषये जागरूकता-वर्धनमस्ति।
अयं कार्यक्रमः राष्ट्रियस्तरीयाभियानस्य एकः अंशः, यत्र शतं संस्थाः शतसंख्याकनगरेषु योगस्य प्रचारं कुर्वन्ति। प्रातःकालीन-कार्यक्रमस्य मुख्यमाकर्षणं "सामान्ययोग-प्रोटोकॉल"-इत्यस्य अभ्यासः भविष्यति, यत्र छात्राणाम्, शिक्षकानां तथा सामान्यजनानां व्यापकांशग्रहणं प्रत्याशितम्। अस्मिन् कार्यक्रमे अंशग्रहणाय विद्यालय- महाविद्यालयाः, राष्ट्रियसेवायोजना, आङ्गनवाडी- आशाकर्मिणः, स्थानीययोगप्रतिष्ठानानि, योगसाधकाः, समाजस्य विविधस्तराणां जनाः आमन्त्रिताः सन्ति। आयोजकाः अस्मिन् कार्यक्रमे अंशग्रहणाय सर्वान् आन्तरिकतया निवेदयन्ति।अन्ताराष्ट्रिय- योगदिवस– २०२६ इत्यस्य काउन्टडाउन- कार्यक्रमस्य अङ्गरूपेण "स्वस्थतायै प्रज्ञायै विश्वशान्तये च योगः" इति शीर्षकेण एका चर्चागोष्ठी अपि विश्वविद्यालयस्य स्थायीसभागारे आयोजयिष्यते। विश्वविद्यालयकर्तृपक्षाणां आशा अस्ति यत् जनपदे अयं प्रथमप्रयासः समाजस्य सर्वस्तराणां जनान् आकर्षयिष्यति, योगं प्रति जागरूकतां वर्धयिष्यति, अन्ताराष्ट्रिय- योगदिवस– २०२६ इत्यस्मात् पूर्वमेव स्वस्थता- समन्वय- कल्याणानां संस्कृति-निर्माणे सहायकः भविष्यति।






हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा- २८

सृष्टौ पारस्परिकं प्रेम, आकर्षणं वा वर्तते। इत्यतो जगत् निरन्तरं प्रवर्तमानमस्ति। प्रेम मानवहृदयस्य किञ्चन मधुरतमं, सुन्दरतमञ्च एकं दिव्यवस्तु वर्तते। तत्तु तदेव महद्वस्तु स्यात् यच्च मनुष्यजीवनं जीवितुं योग्यं कुर्यात्। प्रेमविहीनो मनुष्यः चलन् शवः इव कथ्यते, न वा अपरः। मानवहृदयतो यस्मिन् दिने प्रेमलोपः सम्भवेत्, तद्दिनतो हि स मनुष्यः कश्चन क्रूरः, निर्दयी, हिंसकः, राक्षसः अथवा अपदार्थवद् भवेत्। मनुष्यस्य प्रेमपरिधिः व्यापकः। सः कदाचित् कृष्णो भूत्वा राधया सह प्रेम कुर्यात्, कदाचित् सिद्धार्थो भूत्वा आहत- हंसार्थं विचलितो भवेत्, एवं कदाचिच्च देशभक्तो भूत्वा महत् देशप्रेम समाचरेत्। परन्तु एतेष्वपि सर्वश्रेष्ठं तु सर्वजीवान्, मानवान् वा प्रति समाचरितं मानवमनसि उद्भूतं प्रेम हि स्यात्। चण्डीदासस्य मतानुसारम् विवेकदृष्ट्या सर्वस्मादुपरि मनुष्यो वर्तते, तस्मादुपरि चेन्न किमपि विद्यते। यदि मनुष्यहृदये जीवमात्रं प्रति प्रेमभावो नोत्पद्यते, तर्हि तस्य जीवनं निरर्थकम्। महान् लेखकः पंतो युगान्ते कथयति- "सुन्दर है विहंग, सुमन सुन्दर, मानव तुम सबसे सुन्दरतम" इति। प्रकृत्याः सर्वोत्तमा रचना- 'मानवः' इत्येव। तेन मानवकुलेन सह यदि कस्यचन प्रेम न भवेत्, तर्हि तादृशो जनः 'मानवः' इति नाम्ना ख्यापयितुं नैव योग्यः, अधिकारी वा। क्षुद्रस्वार्थस्य तथा पारस्परिकस्य दुराग्रहादिकस्य कारणतो मानवो मानवस्य उपेक्षां कुर्यात्, तस्मै असूयां, घृणाञ्च आचरेत्। मानवेषु कदाचित् जाति- वर्ण- धर्म- अस्पृश्यभावनादिकारणतः साम्प्रदायिक- कलहः उत्पद्यते, तस्मात् प्रेममार्गः अवरुध्यते। परञ्च स हि मनुष्यो महान् कथ्यते यश्च एतत्संकीर्णताक्षुल्लकादिभ्यः उपरिष्टात् उत्तीर्य विश्वमैत्र्याः एवं मानवप्रेम्णः पवित्रधारायाम् अवगाहनं कुर्यात्। यस्य अन्तरात्मनि मानवमात्रं प्रति विशुद्धं प्रेम स्यात्, तस्य कृते तु अखिलं जगद्धि स्वकुटुम्बत्वेन तिष्ठति।

अद्य विश्वे महती युद्धसम्भावना दरीदृश्यते, मानवता विनाशगर्ते पतिता इव। एतस्य कारणं यत् मानवस्य मानवं प्रति प्रेम नास्ति, तच्छून्यवद्वा। कारणं यदि मानवो मानवस्य प्रेमविषये सम्यक् अचिन्तयिष्यत् तर्हि लोके युद्धसम्भावना कथं वा अभविष्यत्? मानवप्रेम्णः अभिवृद्धौ जगतः साहित्यकाराणां महत् योगदानमस्ति। कालिदासः, कीट्स, गेटे, दांते, प्रेमचन्दः, गोर्की इत्यादिभिः बहुभिः साहित्यकारैः मानवो मानवस्य सन्निधौ प्रेरितोऽस्ति। अद्यतनैरस्माभिरपि एतादृशस्य सामाजिक- परिवेशनिर्माणस्य प्रयत्नः करणीयः, यत् विश्वस्य भाविसन्तानाः पारस्परिकं प्रेम हि प्रेम आचरेयुः। परन्तु एवं न भवेत् यत् एको विषाक्तभावनायुतः, घृणोपेतः, हिंसायुतः कालसर्पः च भूत्वा अपरं दशेत् इति। कारणं पारस्परिकं विशुद्धं प्रेमाचरणं हि विश्वे मानवतायाः रक्षकं भवति। समाजनिर्माणाय प्रेमास्त्रं हि महच्छक्तिसम्पन्नं दिव्यास्त्रं कथ्यते इति, शुभम्।

# लौकिकन्यायकोशः

## लशुनभक्षणन्यायः

लशुनभक्षणं निषिद्धमिति कथ्यते। रोगनिवारणार्थं केनचिद् रूग्णेन लशुनं भक्षितं चेदपि रोगोपशमनं न जातं चेत् निषेध- उल्लङ्घनस्य पापमात्रम् एव फलं भवति खलु। एवं कस्यचित् नियमस्य उल्लङ्घनेनापि फलं न प्राप्तम् इति बोधयितुम् अस्य प्रयोगः क्रियते।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्तासंवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।काव्या- नमस्ते नन्दिनि। अद्य बहुविचित्राः वार्ताः श्रुताः। गुरुग्राम-नगरे कश्चन पुरुषः मिलन-जालपुटेन वञ्चितः। भोजनार्थं द्वाविंशति-सहस्र-रूप्यकाणि तेन दत्तानि सन्ति। नन्दिनी- धिक् तं वञ्चकम्! लोभः तु विनाशकः। इदानीं सुखदा वार्ता। विमानयाने कस्यचित् रुग्णस्य प्राणरक्षणं भिषजा कृतम्। सर्वैः विमानकर्मचारिभिः अपि साहाय्यं विहितम्।काव्या- शोभनम्, भिषजः तु देवतुल्याः। परन्तु बेङ्गळूरुनगरे तु महान् सन्तापः। तत्र प्रचण्ड- उष्णतया गृह-मध्यस्थाः वर्ण-वर्तिकाः अपि द्रुताः। नन्दिनी- सत्यम्, प्रकृतिः कुपिता दृश्यते। भाग्यनगरे अपि मशकानां भयम् अस्ति। तत्र एकः आरक्षकः मशक-जालस्य अन्तः स्थित्वा कर्तव्यं कृतवान् अस्ति।

# सत्य साईं सेवा सङ्गठनस्य तत्त्वाधाने कोटला-नगरस्य सामुदायिक- चिकित्सालये निःशुल्क-चिकित्साशिविरस्य आयोजनम्




हिमसंस्कृतवार्ता। सत्य साईं सेवा सङ्गठनस्य तत्त्वाधाने कोटला-नगरस्य सामुदायिक-चिकित्सालये रविवासरे एकदिवसीयस्य निःशुल्क-चिकित्साशिविरस्य (मेडिकल कैंप) सफलम् आयोजनम् अभवत्। अस्मिन् शिविरे क्षेत्रस्य शतशः जनाः स्वस्य स्वास्थ्यपरीक्षणं कारितवन्तः, विशेषज्ञ-चिकित्सकैः सह परामर्शं च प्राप्तवन्तः। अस्य शिविरस्य मुख्या विशेषता टांडा-चिकित्सा- महाविद्यालयस्य तथा पालमपुरस्य वरिष्ठ-चिकित्सकानाम् उपस्थितिः आसीत्। शिविरे विविध-विभागानाम् अनुभविनः वैद्याः स्वसेवां प्रदत्तवन्तः, येषु मुख्याः सन्तिः तन्त्रिका-तन्त्र-विभागात्: डॉ. अमित भारद्वाजः, स्त्री एवं प्रसूति-रोग-विभागात्: डॉ. अमित गुप्तः, डॉ. मनीषा, डॉ. भारती गुप्ता च सामान्य-चिकित्सा-विभागात्: डॉ. विवेक सूदः, डॉ. केशव कौंडलः च कर्ण-नासा-कण्ठ-विभागात् (ENT): डॉ. बी.एस. गुलेरिया, नेत्र-रोग-विभागात्: डॉ. शैलेन्द्र मिन्हासः, बाल-रोग-विभागात्: डॉ. अविनाश शर्मा, डॉ. सपना भारद्वाजः च, अस्थि-रोग-विभागात्: डॉ. राजीव कपिला, दन्त-रोग-विभागात्: डॉ. कुलदीप जरयालःअस्मिन् अवसरे चिकित्सकदलस्य नेतृत्वं कुर्वन् डॉ. बी.एस. गुलेरिया महोदयः उक्तवान् यत्— "सत्य साईं बाबा महोदयेन सदैव 'मानव सेवा एव माधव सेवा' इति रूपेण स्वीकृता।" सत्य साईं सेवा सङ्गठनस्य सदस्यैः प्रतिपादितं यत् अस्य शिविरस्य मुख्योद्देश्यं ग्रामीणक्षेत्राणां तादृशानां जनानां कृते उच्चस्तरीयां चिकित्सासुविधां प्रापयितुं अस्ति, ये विशाल-चिकित्सालयान् प्रति गन्तुम् असमर्थाः सन्ति। शिविरकाले न केवलं निःशुल्कपरामर्शः दत्तः, अपितु अनेकेभ्यः रोगिभ्यः उचितं स्वास्थ्यमार्गदर्शनं तथा च निःशुल्कौषधानि अपि वितरितानि। स्थानीयवासिनः सङ्गठनस्य अस्य मानवीयप्रयासस्य भूरि- भूरि प्रशंसां कृतवन्तः।



यदा तु भाजपादले योग्यतायाः आधारेण महिलाः अग्रे नीयन्ते।

# प्रियङ्का महिलानाम् अधिकाराणां युद्धं किमर्थं त्यक्तवती - सरोजपाण्डे

भाजपा-राष्ट्रिय-उपाध्यक्षा तथा राज्यसभा-सांसदः सरोज-पाण्डे अवदत् यत् महिलाः सुदीर्घकालं यावत् केवलं 'वोट-बैङ्क' (मतकोष) रूपेण उपयुक्ताः, किन्तु यदा ताभ्यः अधिकारप्रदानस्य अवसरः आगतः, तदा काङ्ग्रेसपक्षः पृष्ठतः हतः। तया प्रियङ्का-गान्ध्याः पुत्री अस्मि, योद्धुं शक्नोमि (लड़की हूँ, लड़ सकती हूँ) इति घोषवाक्ये प्रश्नं कुर्वन्त्या उक्तं यत् महिलानाम् अधिकाराणां महत्तमे युद्धकाले एतत् घोषवाक्यं कुत्रापि न दृष्टम्। तया कथितं यत् संसदि विधेयके (Bill) पतिते सति विपक्षस्य व्यवहारः महिलाः प्रति असंवेदनशीलतां दर्शयति, एतत् च सम्पूर्णदेशस्य महिलानाम् अपमानम् अस्ति।